सिनी हन्त हृसत्ययं विधिः । तडिल्लतेयं न चकास्ति चञ्चला पुरःस्मरज्योतिरिदं विजृम्भते" तत्र केतकीसूचीनां विधिहासतः प्रतीयमानसादृश्येन तडिल्लतायाः स्मरज्योतिषापह्नुतिः । अनौपम्या यथा "राजकन्यानुरक्तं मां रोमोद्भेदेन रक्षकाः । अवगच्छेयुराज्ञातमहो शीतानिलं वनम्" नचात्र सादृश्यमस्ति ।

१५ अप्रस्तुतप्रशंसा २६४ पृष्ठे उक्तलक्षणोदाहरणा ।

१६ अभावः । "असत्ता या पदार्थानामभावः सोऽभिधीयते । प्रागभावादिभेदेन स षड्विध इष्यते । स०क० प्रागभावः ध्वंसः अत्यन्ताभाव मिथ्यापदार्थाभाव इतरेतराभावः अभावाभावाश्च तत्र ध्वंसो यथा "धतिरस्तमिता गतिश्च्युता विरतं गेयमृतुर्निरुत्सवः । गतमाभरणप्रयोजनं परिशून्यं शयनीयमद्य मे" । इतरेतराभावो यथा । "कर्णोत्पलं न चक्षुस्ते न चक्षुः श्रवणोत्पलम् । इति जानन्नपि जनो मन्यते नेत्रदीर्घताम्" असत्याभावः यथा "प्रसीद सद्यो मुञ्चेमं चण्डि ! मानं मनोगतम् । दृष्टमात्रेऽपि ते तत्र रोषः खकुसुमायते" । सामर्थ्याभावो यथा । "मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः । न प्रभातरलज्योतिरुदेति वसुधातलात्" अन्योदाहरणानि तत्रैव द्रष्टव्यानि ।

१७ अभिदाहेतुः "अभेदेनाभिदाहेतुर्हेतोर्हेतुमता सह" । च० "लक्ष्मीविलासो भवतः कटाक्षवेक्षणं प्रभो" !

१८ अर्थान्तरन्यासः, २७१ पृष्ठे उक्तोदाहरणलक्षणः ।

१९ अर्थापत्तिः, २७२ पृष्ठे उक्तलक्षणोदाहरणा । स०कण्ठा० "प्रत्यक्षादिप्रतीतोऽर्थोयोऽन्यथा नोपपद्यते । अर्थान्तरञ्च गमयत्यर्थापत्तिं वदन्ति ताम् । सर्व्वप्रमाणपूर्व्वत्वादेकशोऽनेकशश्च सा । प्रत्यक्षपूर्व्विकेत्यादिभेदैः षोढ़ा निगद्यते । प्रत्यक्षपूर्व्विका यथा "निर्ल्लेतुं शक्यमस्तीति मध्यं तव नितम्बिनि ! । अन्यथानुपपत्त्यैव पयोधरभरस्थितेः" । अनुमापूर्व्विका यथा "कपोलपुलकेनास्याः सूचितो मदनज्वरः । मनो निरन्तरासक्तः सद्यः कथयति प्रिये' योऽयं कपोलपुलकेनानुमितो मदनज्वरः स प्रिये मनसः निरन्तरासक्तिं विनानुपपद्यमानः अनुरागं कल्पयतीत्यनुमानपूर्व्विकार्थापत्तिः एवमन्या उदाहार्य्याः ।

२० अल्पम् "अल्पन्तु सूक्ष्मयादाधेयाद्यदाधारस्य सूक्ष्मता" । "मणिमालोर्म्मिका तेऽद्य करे जपवटायते" ।

२१ अवज्ञा "इद्धिहानो न चेत् स्यातामवज्ञालङ्कृतिश्च" सा न । "स्वल्पमेवाम्बु लभते पान्थः प्राप्यापि सागरम्" "मीलन्ति यदि पद्मानि का हानिरमृततद्युतेः" ।

२२ असङ्गतिः "विरुद्धभिन्नदेशत्वं कार्य्यहेत्वोरसङ्गतिः१ । अन्यत्र कारणार्थस्य ततोऽन्यत्र कृतिश्च या२ । अन्यत् कर्त्तुं प्रवृत्तौ च तद्विरुद्धकृतिश्च या३" च० । क्रमेणोदाहरणानि । "विषं जलधरैः पीतं मूर्च्छिता पथिकाङ्गनाः१" । "अपारिजाताम् वसुधां चिकीर्षन् द्यां तथाऽकृथाः"२ । अपगतमरिजातं यस्याः नास्ति पारिजातो यत्र इति च । "गोत्रोद्धारप्रवृत्तोऽपि गोत्रोद्धारं पुराऽकरोः३ । गोत्रा पृथ्वी गोत्रः पर्वतश्च ।

२३ असम्भवः "असम्भवोऽर्थनिष्पत्तेरसम्भाव्यत्ववर्णनम् ।" च० "कोवेद गोपशिशुकः शैलमुत्पाटयिष्यति" ।

२४ आक्षेपः "आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात्१ । निषेधाभासमाक्षेपं बुधाः केचन मन्वते२ । आक्षेपोऽन्योविधौ व्यक्ते निषेधे च तिरोहिते३" । च० "चन्द्र ! संदर्शयात्मानमथवास्ति प्रियामुखम्"१ । "नाहं दूति ! तनोस्तापस्तस्याः कालानलोपमः२" । "गच्छ गच्छसि चेत् कान्त ! पन्थानः सन्तु ते शिवाः । ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान्" । ३

२५ आगमः "यदाप्तवचनं तद्धि ज्ञेयमागमसंज्ञया । उत्तमं मध्यमं चाथ जघन्यं चेति तत् त्रिधा" । स०क० तत्रोत्तमं विधिरूपं निषेधरूपञ्च । विधिरूपं यथा "दमं दानं दयां शिक्षे"रित्यादौ दास्यत दत्त दयध्वं इति विधिः । निषेधरूपं यथा "निवार्य्यतामालि ! किमप्ययं वटुः पुनर्विवक्षुः स्फुरितोत्तराधरः । न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभाक्" । तथाच महान्तो नापभाषितव्या इति वाक्यार्थमर्य्यादया निषेधरूप उपदेशः । तदेतदुभयमप्यवश्यानुष्ठेयत्वादुत्तमम् । मध्यममपि द्विधा निर्दिष्टवक्तृकमनिर्दिष्टवक्तृकञ्च तत्राद्यं यथा "कल्याणी वत गाथेयं लौकिकी प्रतिभाति मे । एति जीवन्तमानन्दो नरं वर्षशतादपि" अत्र जीवन्नरः पश्यति भद्रमित्यर्थो निर्दिष्टवक्तृकतया निर्दिष्टः तत्र जीवनाय यतितव्यमिति रूपमाप्तवचनम् । "अक्षे वसति पिशाचो पिचुमर्द्दे दिनपतिर्वटे यक्षः । विश्राम्यति पद्मे श्रीस्तिष्ठति गौरी मधूकतरौ" तदिदमनिर्द्दिष्टवक्तृकमनादिलोकप्रसिद्धपारम्पर्य्यमैतिह्यम् । अत्र सर्व्ववाक्यानां निषेधपर्य्यवसानात् अक्षं न सेवेत, पिचुमर्द्दं न निन्देत, वटं न छिन्द्यात्, पद्मं मूर्द्ध्नि न बिभूयात्, मधूकं न पदा स्पृशेत्" इति निषेधचतुष्टयरूपआगमः । जघन्यं द्वेधा काम्यं निषिद्धं च । तत्र निषिद्धविषयविधिर्यथा "वयं बाल्ये बालांस्तरुणि-